# श्री मंगलचंडी स्तोत्रं

**। ध्यानं ।**

देवीं षोडश वर्षीयां । शश्वत् सुस्थिर यौव्वनाम् ॥
बिंबोष्ठीं सुदतीं शुद्धां । शरत्पद्म निभाननाम् ॥
श्वेत चंपक वर्णाभां । सुनीलोत्पल लोचनाम् ॥
जगद्धांत्रीं च दात्रींच । सर्वेभ्यः सर्व संपदाम् ॥
संसारसागरे घोरे । ज्योती रूपां सदाभजे ॥
देव्यश्च्य ध्यान मित्येवं । श्रद्धया श्रूयतां मुने ॥

**। श्री महादेव उवाच ।**

रक्ष रक्ष जगन्मातर्देवि । मंगल चंडिके ॥
हारिके विपदां राशेः । हर्ष मंगल कारिके ॥
हर्ष मंगल दक्षेच । शुभे मंगल चंडिके ॥
मंगळे मंगलार्हेच । सर्व मंगल मंगले ॥
सदा मंगल दे देवी । सर्वेषां मंगलालये ॥
पूज्ये मंगल कारेच । मंगलाभीष्टदेवते ॥
पूज्ये मंगल भूपस्य । मनुवंशस्य संततम् ॥
मंगलाधिष्ठातृदेवि । मंगलानां च मंगले ॥
संसार मंगलाधारे । मोक्ष मंगलदायिनि ॥
सारेच मंगलाधारे । सारेच सर्वकर्मणाम् ॥
प्रति मंगलवारेच । पूज्ये मंगल सुखप्रदे ॥

॥ इदि शिवकृत मंगलचंडी स्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam